## अन्तः। (२०/२९८४)

अनितेः इति वर्तते। उपसर्गस्थान्निमित्तात् उत्तरस्य अनितिनकारस्य पदान्ते वर्तमानस्य णकारादेशो भवति। हे प्राण्। हे पराण्। पदान्तस्य इति प्रतिषेधस्य अपवादोऽयम्। अन्तश्च [1]पदापेक्षो गृह्यते। केचित्तु पूर्वसूत्रे एव एतदन्तग्रहणं सामीप्यार्थम[2]भिसम्बध्नन्ति। निमित्त[3]समीपस्थैकवर्णव्यवहितस्य अनितिनकारस्य [4]पदान्ते वर्तमानस्य णकारादेशो यथा स्यात्। इह मा भूत्, पर्यनिति इति। तैर्द्वितीयमपि [5]पदान्तस्य णत्वार्थमन्तग्रहणमा[6]श्रयितव्यमेव। येषां तु पर्यणिति [7]इति भवितव्यम् इति दर्शनम्, तेषां पूर्वसूत्रे नार्थोऽन्तग्रहणेन॥

## उभौ साभ्यासस्य। (२१/२६०६)

[8]साभ्यासस्य अनितेः उपसर्गस्थान् निमित्तादु[9]त्तरस्य उभयोः नकारयोः णकार आदेशो भवति। प्राणिणिषति। प्राणिणत्। पराणिणिषति। पराणिणत्। '[10]पूर्वत्रासिद्धीयमद्विर्वचने' (पु.प. ९२) इत्येतस्मिन् सति पूर्वेणैव [11]कृतणत्वस्य द्विर्वचने कृते सिद्धमेतदन्तरेणापि [12]वचनम्? एतत् तु नाश्रयितव्यम् इति सूत्रमिदमारभ्यते। [13]तेन औजढत् इति सिद्धं भवति॥

## हन्तेरत्पूर्वस्य। (२२/३७०)

अकारपूर्वस्य [14]हन्तिनकारस्य उपसर्गस्थात् निमित्तादुत्तरस्य णकार आदेशो भवति। प्रहण्यते। परिहण्यते। प्रहणनम्। परिहणनम्। अत्पूर्वस्य इति किम्? प्रघ्नन्ति। परिघ्नति। तपरकरणं किम्? [15]चिणि – प्राघानि। पर्यघानि॥

## वमोर्वा। (२३/२४२९)

[16]हन्तेः इति वर्तते[17]। वकारमकारयोः परतः हन्तिनकारस्य उपसर्गस्थान् निमित्तादुत्तरस्य वा णकारादेशो भवति। प्रहण्वः, प्रहन्वः। परिहण्वः, परिहन्वः। प्रहण्मः, प्रहन्मः। परिहण्मः, परिहन्मः[18]॥

## अन्तरदेशे। (२४/३२९४)

[19]अन्तःशब्दादुत्तरस्य [20]हन्तिनकारस्य अत्पूर्वस्य णकारादेशो भवति अदेशाभिधाने। अन्तर्हण्यते। अन्तर्हणनं वर्तते। अदेशे इति किम्? अन्तर्हननो देशः। अत्पूर्वस्य [21]इत्येव, अन्तर्घ्नन्ति। तपरकरणं [22]किम्? अन्तरघानि॥

---

1. पादापेक्षो क, पदापेक्षया इ. ह. 2. उपबध्नन्ति इ. 3. समीपस्थैव एकवर्णव्यवहितस्य क. इ. 4. पदान्ते वर्तमानस्य नास्ति ब. 5. अन्तग्रहणं क. ड. इ. 6. आश्रयितव्यम् नास्ति ड. 7. इत्येवम् ड. ह. 8. अनितेः इति वर्तते उपसर्गात् इति च इत्यधिकम् क.इ.ह. 9. उत्तरयोः नकारयोः क.ड. 10. पूर्वत्रासिद्धमपि वर्तते इत्येतस्मिन् सति इ. 11. कृते क. 12. णत्ववचनं क. 13. तेन नास्ति ब.क.ड. 14. हन्तेः क.इ.ह. 15. चिणि नास्ति ब. 16. वाक्यमिदं नास्ति ब. 17. उपसर्गात् इति च इत्यधिकम् क.इ.ह. 18. पूर्वेण नित्ये प्राप्ते विकल्पः इत्यधिकम् ब, पूर्वेण नित्ये प्राप्ते विकल्पार्थमारभ्यते इत्यधिकम् क.इ. 19. हन्तेरत्पूर्वस्य इति वर्तते इत्यधिकम् क. 20. हन्तेः क. 21. इति किम् क. 22. इत्येव क, तपर इत्येव इ.